# Shri Subrahamanyasya ShoDashamUrtidhyAnabhedAH

# શ્રીસુબ્રહ્મણ્યસ્ય ષોડશમૂર્તિધ્યાનભેદાઃ

## Document Information

Text title : Subrahmanya ShoDashamurti Dhyana Bhedah

File name : subrahmaNyaShoDashamUrtidhyAnabhedAH.itx

Category : subrahmanya, ShoDasha, dhyAnam

Location : doc_subrahmanya

Proofread by : Preeti N. Bhandare pnbhandare at gmail.com

Description/comments : Kumaratantra Dvitiyapatala Shloka 60+

Latest update : December 23, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2022

*sanskritdocuments.org*

# શ્રીસુબ્રહ્મણ્યસ્ય ષોડશમૂર્તિધ્યાનભેદાઃ

જ્ઞાનશક્તિધરઃ સ્કન્દો દેવસેનાપતિસ્તથા ।
સુબ્રહ્મણ્યો ગજારૂઢઃ શરકાનનસમ્ભવઃ ॥ ૧॥

કાર્તિકેયઃ કુમારશ્ચ ષણ્મુખસ્તારકાન્તકઃ ।
સેનાનીર્બ્રહ્મશાસ્તા ચ વલ્લીકલ્યાણસુન્દરઃ ॥ ૨॥

બાલશ્ચ ક્રૌઞ્ચભેત્તા ચ શિખિવાહન એવ ચ ।
એતાનિ સ્વામિનામાનિ ષોડશ પ્રત્યહં નરઃ ॥ ૩॥

યઃ પઠેત્સર્વપાપેભ્યોઃ સ મુચ્યેત મહામુને ।
એતેષાં પ્રતિરૂપાણાં ધ્યાનભેદમથોચ્યતે ॥ ૪॥

(૧) અથ શક્તિધરસ્વામિધ્યાનમ્-
એકાસ્યં દ્વિભુજં વામે વજ્રં દક્ષિણજે કરે ।
ઇચ્છાજ્ઞાનક્રિયાશક્તિરૂપં શક્તિધરં ભજે ॥ ૫॥

(૨) સ્કન્દસ્વામિધ્યાનમ્ -
કલ્પદ્રુમં પ્રણમતાં કમલારુણાભં
    સ્કન્દં ભુજદ્વયમનામયમેકવક્ત્રમ્ ।
કાત્યાયનીસુતમહં કટિબદ્ધદામ
    કૌપીનદણ્ડધરદક્ષિણહસ્તમીડે ॥ ૬॥

(૩) સેનાપતિધ્યાનમ્—
નૌમ્યાદિત્યપ્રદીપ્તં દ્વિદશનયનકં ષણ્મુખં મન્દહાસં
    વામાઙ્કે સુસ્થિતાયાસ્સરસિરુહધૃતાલિઙ્ગિતાયાઃ પ્રિયાયાઃ ।
ઉત્તુઙ્ગોરુસ્તનાગ્રે વિહિતકરતલં ભીતિખેટાદિશૂલ-
    હ્રાદિન્યુદ્દીપ્તશક્તીષ્વસનવનગદાકુક્કુટાબ્જેષુ હસ્તમ્ ॥ ૭॥

(૪) સુબ્રહ્મણ્યસ્વામિધ્યાનમ્-
સિન્દૂરારુણમિન્દુકાન્તિવદનં કેયૂરહારાદિભિ-

દિવ્યૈરાભરણૈર્વિભૂષિતતનું સ્વર્ગાદિસૌખ્યપ્રદમ્ ।
અમ્ભોજાભયશક્તિકુક્કુટધરં રક્તાઙ્ગરાગોજ્જ્વલં (રક્તાઙ્ગરાગાંશુકં)
સુબ્રહ્મણ્યમુપાસ્મહે પ્રણમતાં ભીતિપ્રણાશોદ્યતમ્ ॥ ૮॥

અન્યચ્ચ-
એકવક્ત્રં દ્વિદોર્દણ્ડં કટિબદ્ધાભયાન્વિતમ્ ।
તરુણારુણસઙ્કાશં સુબ્રહ્મણ્યમુપાસ્મહે ॥ ૯॥

(૫) ગજવાહનસ્વામિધ્યાનમ્-
એકાનનં દ્વિનયનં વરકુક્કુટૌ ચ
વામદ્વયે નિશિતશક્ત્યભયદ્વયં ચ ।
બિભ્રાણમીશ્વરસુતં તપનાયુતાભં
નિત્યં નમામિ ગજવાહનમિષ્ટસિદ્ધ્યૈ ॥ ૧૦॥

(૬) શરવણભવસ્વામિધ્યાનમ્-
શક્તિં ઘણ્ટાં ધ્વજસરસિજે કુક્કુટં પાશદણ્ડૌ
ટઙ્કં બાણં વરદમભયદં કાર્મુકં ચોદ્વહન્તમ્ ।
પીતં સૌમ્યં દ્વિદશનયનં દેવસઙ્ઘૈરુપાસ્યં
સદ્ભિઃ પૂજ્યં શરવણભવં ષણ્મુખં ભાવયામિ ॥ ૧૧॥

(૭) કાર્તિકેયસ્વામિધ્યાનમ્-
વરદકુલિશખેટં વામહસ્તત્રયે ચ
દધતમભયશક્તિં ખણ્ડમન્યત્રયે ચ ।
તરુણરવિસમાભં સાધુભિઃ પૂજ્યમાનં
કમલવદનષટ્કં કાર્તિકેયં નમામિ ॥ ૧૨॥

(૮) કુમારસ્વામિધ્યાનમ્-
સવ્યદ્વયે નિશિતશક્ત્યસિમાદધાનં
વામદ્વયેઽભિમતકુક્કુટખેટકં ત્વામ્ । (ખેટકં ચ)
વલ્લીપતિં વિબુધલોચનપૂર્ણચન્દ્રં
કલ્યાણદાનનિરતં કલયે કુમારમ્ ॥ ૧૩॥

(૯) ષણ્મુખસ્વામિધ્યાનમ્-
વન્દે સિન્દૂરકાન્તિં શરવિપિનભવં શ્રીમયૂરાધિરૂઢં
ષડ્વક્ત્રં દેવસૈન્યં મધુરિપુતનયાવલ્લભં દ્વાદશાક્ષમ્ ।
શક્તિં બાણં કૃપાણં ધ્વજમપિ ચ ગદાં ચાભયં સવ્યહસ્તૈઃ

ચાપં વજ્રં સરોજં કટકમપિ વરં શૂલમન્યૈર્દધાનમ્ ॥ ૧૪॥

(૧૦) તારકારિસ્વામિધ્યાનં
વરદમઙ્કુશધ્વજે ચ કટકૌ ચાપવજ-
મભયપાશચક્રખડ્ગમુસલશક્તિમન્વહમ્ ।
દ્વિદશપાણિભિર્દધાનમરુણકોટિસન્નિભં
ભજત તારકારિમત્ર ભવવિનાશકારણમ્ ॥ ૧૫॥

(૧૧) સેનાપતિસ્વામિધ્યાનમ્-
અભયમસિરથાઙ્ગં ચાઙ્કુશં શક્તિશૂલં
વરદકુલિશપાશં પદ્મદણ્ડૌ ગદાં ચ ।
દધતમુભયપક્ષદ્વાદશાયામહસ્તૈ-
ર્દ્વિદશકમલનેત્રં દેવસેનાન્યમીડે ॥ ૧૬॥

(૧૨) બ્રહ્મશાસ્તૃધ્યાનમ્-
વામે કરે ચ યુગલે વરકુણ્ડિકે ચ
સવ્યેઽક્ષસૂત્રમભયં દધતં વિશાખમ્ ।
વલ્લ્યાયુતં વનજલોચનમેકવક્ત્રં
વન્દામહે વનજસમ્ભવશાસિતારમ્ ॥ ૧૭॥

(૧૩) વલ્લીકલ્યાણસુન્દરસ્વામિધ્યાનમ્-
હસ્તદ્વન્દ્વેઽક્ષમાલામભયમપિ ધૃતં કુણ્ડિકાં શ્રોણિબન્ધં
સવ્યે વામે નિષણ્ણઃ શ્રવધૃતવિધિનાહૂયમાનેન યુક્તમ્ ।
સર્વાલઙ્કારયુક્તં જલકલશધૃતા વિષ્ણુના ચારુણાભં
વલ્લીકલ્યાણમૂર્તિં સકલસુરગણૈઃ સ્તૂયમાનં પ્રપદ્યે ॥ ૧૮॥

(૧૪) બાલસ્વામિધ્યાનમ્-
પદ્મસવ્યકટિસંયુતવામં
પદ્મકાન્તિનિભમેકમુખં ચ ।
બાલવૃદ્ધિકરમીશ્વરસૂનું
બાલમુન્નતભુજં પ્રણતોઽસ્મિ ॥ ૧૯॥

અન્યચ્ચ-
એકવક્ત્રં દ્વિનયનં પદ્મદ્વયકરદ્વયમ્ ।
વિપ્રપ્રિયકરં વન્દે બાલરૂપં રવિપ્રભમ્ ॥ ૨૦॥

(૧૫) ક્રૌઞ્ચભેદનસ્વામિધ્યાનં -

અભયશિતકૃપાણૌ શક્તિબાણૌ ચ સવ્યે
    વરદકુલિશચાપં ખેટકે ચાન્યહસ્તે ।
દધતમમરસેનાનાયકં ચાષ્ટબાહું
    કમલવદનષટ્કં ક્રૌઞ્ચભેત્તારમીડે ॥ ૨૧॥

(૧૬) શિખિવાહનસ્વામિધ્યાનં
વિદ્રુમપ્રભમેકમુખં વિભું વજ્રશક્તિવરદાભયપાણિમ્ ।
દેવલોકરિપુઘ્નમવિઘ્નદં નૌમિ રુદ્રભવં શિખિવાહમ્ ॥ ૨૨॥

॥ ઇતિ શ્રીકુમારતન્ત્રે દ્વિતીયપટલે શ્રીસુબ્રહ્મણ્યસ્ય
    ષોડશમૂર્તિધ્યાનભેદાઃ સમાપ્તાઃ ॥

Proofread by Preeti N Bhandare

*Shri Subrahamanyasya ShoDashamUrtidhyAnabhedAH*
pdf was typeset on December 23, 2022

Please send corrections to *sanskrit@cheerful.com*